आजानुलम्बिनौ बाहू वृत्तौ पीनौ नृपेश्वरे ।
निःस्वानां रोमशौ ह्रस्वौ श्रेष्ठौ करिकरप्रभौ ।"
इति गारुडे ६६ अध्यायः ॥
(हस्तिशुण्डः । यथा, महाभारते ।१।२७८।२१।
"नकुलस्तस्य नागस्य समीपपरिवर्त्तिनः ।
सविषाणं भुजं मूले खड्गेन निरकृन्तत ॥")
ग्रहस्फुटीकरणार्थं राशित्रयादूनकेन्द्रग्रहादिः ।
राशित्रयादधिकनवपर्य्यन्तषड्न्तरितावशेषः ।
नवराशिभ्योऽधिकं चेत् तदा द्वादशराशिभ्यः
शोध्यश्च भुजः स्यात् । यथा,—
"दोस्त्रिभोनं त्रिभोर्द्धं विशोध्यं रवे-
श्चक्रतोऽङ्काधिकं स्याद्भुजोनं त्रिभम् ।
कोटिरेकैकं त्रिभिः स्यात् पदं
सूर्य्यमन्दोच्चमष्टाद्रयोऽंशा भवेत् ॥"
इति ग्रहलाघवम् ॥
क्षेत्रस्य परिमाणविशेषः । यथा,—
"कोटिश्चतुष्टयं यत्र दोस्त्रयं तत्र का श्रुतिः ।
कोटिं दोः कर्णतः कोटिश्रुतिभ्याञ्च भुजं वद ॥
इष्टो बाहुर्यः स्यात्तत्स्पर्द्धिन्यां दिशीतरो बाहुः ।
त्र्यस्रे चतुरस्रे वा सा कोटिः कीर्त्तिता तज्ज्ञैः ॥
तत्कृत्योर्योगपदं कर्णः दोः कर्णवर्गयोर्विवरात् ।
मूलं कोटिः तत्कृतिकृत्योरन्तरात् पदं बाहुः ॥"
इति लीलावत्यां क्षेत्रव्यवहारः ॥
भुजंकोटरः, पुं, ( भुजस्य कोटर इव । ) कक्षः ।
इति हेमचन्द्रः ।५ । २५३ ॥
भुजगः, पुं, ( भुजं वक्रं गच्छतीति । गम् + डः ।३।
२।३८ इत्यत्र "खच्च डिद्वाच्यः ।" वार्त्तिकोक्तेः
डित् । ततः टिलोपः । ) सर्पः । इत्यमरः ।
१ । ८ । ६ ॥ ( यथा, मेघदूते । ६२ ।
"तस्मिन् हित्वा भुजगवलयं शम्भुना दत्तहस्ता ।
क्रीडाशैले यदि च विचरेत् पादचारेण गौरी ॥")
भुजगदारणः, पुं, ( भुजगं दारयतीति । दॄ +
णिच् + ल्युः । ) गरुडः । इति राजनिर्घण्टः ॥
भुजगाभोजी,, [न्] पुं, (भुजगं आ सम्यक्प्रकारेण
भुङ्क्ते इति । भुजग + आ + भुज + णिनिः ।)
मयूरः । इति राजनिर्घण्टः ॥
भुजगान्तकः, पुं, ( भुजगस्य अन्तकः । ) गरुडः ।
इति राजनिर्घण्टः ॥
भुजगाशनः, पुं, ( भुजगमश्नातीति । अश + ल्युः ।
भुजगः अशनं यस्येति वा । ) गरुडः । इति
त्रिकाण्डशेषः ॥
भुजङ्गः, पुं, ( भुजं वक्रं गच्छतीति । गम + खच् ।
"खच डिद्वाच्य" इति वार्त्ति डित्वपक्षे टिलोपः ।)
सर्पः । ( यथा, रघुः । ६ । ७६ ।
"आक्रान्तपूर्व्वमिव मुक्तविषं भुजङ्गं
प्रोवाच कोशलपतिः प्रथमापराद्धः ॥")
विड्गः । इत्यमरः । १ । ८ । ६ । मेदिनी च ॥
( सीसम् । तद्यथा,—
"सीसं वध्रञ्च वप्रञ्च योगेष्टं नागनामकम् ॥"
नागनामकम् । नागः भुजङ्ग इत्यादि । )
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
जारश्च तदर्थे ।
"त्रिंशद्भागा भुजङ्गस्य गन्धपाषाणपञ्चकम् ।
शुद्धतालकयोर्द्वौ द्वौ वङ्गस्यैकोऽञ्जनात्त्रयम् ।
अन्धमूषीकृतं ध्मातं पक्वं विमलमञ्जनम् ॥"
इति वाभटे उत्तरतन्त्रे त्रयोदशेऽध्याये ॥)
भुजङ्गघातिनी, स्त्री, ( भुजङ्गं सर्पं तद्विषं वा
हन्तीति । हन + णिनिः । स्त्रियां ङीप् । )
क्षुपविशेषः । कङ्कालिका इति ख्यातः । तत्-
पर्य्यायः । छत्रिः २ सर्पाक्षी ३ क्षुतकरी ४
स्पृक्का ५ । इति शब्दचन्द्रिका ॥ सर्पनाशिनी च ॥
भुजङ्गजिह्वा, स्त्री, ( भुजङ्गस्य जिह्वेव आकृति-
र्यस्याः । ) महासमङ्गा । इति राजनिर्घण्टः ॥
( भुजङ्गस्य जिह्वा ।) सर्परसना च ॥ (विवरण-
मस्या महासमङ्गाशब्दे ज्ञातव्यम् ॥)
भुजङ्गप्रयातं, क्ली, ( भुजङ्गवत्प्रयातं गतिरिव
भङ्गीमान् शब्दविन्यासो यस्य । ) द्वादशाक्षर-
पादच्छन्दः । यथा, कालिदासकृतश्रुतबोधे ।
"यदाद्यञ्चतुर्थन्तथा सप्तमञ्चेत्
तथैवाक्षरं ह्रस्वमेकादशाद्यम् ।
शरच्चन्द्रविद्वेषिवक्त्रारविन्दे
तदुक्तं कवीन्द्रैर्भुजङ्गप्रयातम् ॥"
( अधिकन्तु छन्दःशब्दे ज्ञातव्यम् । )
भुजङ्गभुक्, [ज्] पुं, ( भुजङ्गं भुङ्क्ते इति । भुज् +
क्विप् ।) गरुडः । इति शब्दरत्नावली ॥ मयूरः ।
इत्यमरः । २ । ५ । ३० ॥ ( मयूरार्थे पर्य्यायो
यथा,—
"मयूरश्चन्द्रकी केकी मेघरावो भुजङ्गभुक् ।
शिखी शिखावलो वर्ही शिखण्डी नीलकण्ठकः ॥
शुक्लापाङ्गः कलापी च मेघनादः कलाप्यपि ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥)
भुजङ्गभोजी, [ न् ] पुं, ( भुजङ्गं भुङ्क्ते इति ।
भुज + णिनिः ।) राजसर्पः । इति हेमचन्द्रः ॥
भुजङ्गमः, पुं, ( भुज कौटिल्ये + इगुपधेति कः ।
भुजः कुटिलीभवन् गच्छतीति । भुज +
गम् + "गमेः सुपि वाच्यः ।" ३ । २ । ३८ ।
इत्यस्य वार्त्तिकात् खच् । "खच डिद्वाच्यः ।" इति
डिद्भावे टिलोपाभावः । ) सर्पः । इत्य-
मरः । १ । ८ । ६ । ( यथा, रघुः । ६ । ७७ ।
"आरूढमद्रीनुदधीन् वितीर्णं
भुजङ्गमानां वसतिं प्रविष्टम् ॥" )
सीसके, क्ली । इति राजनिर्घण्टः ॥
भुजङ्गलता, स्त्री, ( भुजङ्गवत् कुटिला तत्प्रिया
वा लता । ) नागवल्ली । इति राजनिर्घण्टः ॥
भुजङ्गहा, [ न् ] पुं, ( भुजङ्गं हन्तीति । हन् +
क्विप् ।) गरुडः । इति त्रिकाण्डशेषः ॥
भुजङ्गाक्षी, स्त्री, (भुजङ्गस्य अक्षीव पुष्पं यस्याः ।
"अक्ष्णोऽदर्शनात् ।" ५ । ४ ।७६ । इति अच् ।
गौरादित्वात् ङीष् । ) रास्ना । इत्यमरः ।
२ । ४ । ११५ ॥ (रास्ना भेदनाइ इति लोके ।
तथास्याः पर्य्यायान्तरम् ।
"नाकुली सुरसा नागसुगन्धा गन्धनाकुली ।
नकुलेष्टा भुजङ्गाक्षी सर्पाक्षी विषनाशिनी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
भुजङ्गाख्यः, पुं, (भुजङ्गस्य आख्या आख्या यस्य ।)
नागकेशरः । इति शब्दमाला सर्पनामके,
त्रि ॥
भुजशिरः, [ स् ] क्ली, ( भुजस्य शिर इव । )
स्कन्धः । इत्यमरः ॥ २ । ६ । ७८ ॥
भुजा, स्त्री, (भुज + टाप् । ) बाहुः । करः । इति
मेदिनी । जे, १३ ॥ (यथा, शिशुपालवधे ।७।७१।
"अविरतकुसुमावचायखेदा
न्निहितभुजालतयैकयोपकण्ठम् ॥")
भुजाकण्टः, पुं, ( भुजायाः करस्य कण्ट इव । )
हस्तनखः । इति हेमचन्द्रः ॥
भुजादलः, पुं, ( भुजाया बाहोर्दल इव ।) हस्तः ।
इति त्रिकाण्डशेषः ॥
भुजान्तरं, क्ली, (भुजयोरन्तरं मध्यम् ।) क्रोडम् ।
इत्यमरः ।२।६।७७॥ (वक्षः । यथा, रघुः।३।५४।
"दिलीपसूनोः स बृहद्भुजान्तरं
प्रविश्य भीमासुरशोणितोचितः ।
पपावनास्वादितपूर्व्वमाशुगः
कुतूहलेनेव मनुष्यशोणितम् ॥"
भुजस्यान्तरं प्रभेदः । ) हस्तप्रभेदश्च ॥
भुजिः, पुं, ( भुनक्ति भुङ्क्ते वा सर्व्वानिति ।
भुज + "भुजेः किच्च ।" उणा० ४ । १४९ । इति
इः । स च कित् । सर्व्वभक्षकत्वादस्य तथा-
त्वम् ।) वह्निः । इत्युणादिकोषः ॥ (भुज + भावे
इः । भोगः । यथा, ऋग्वेदे । ८ । ६१ । ६ ।
"आसवं सवितुर्यथा भगस्येव भुजिं हुवे ।
अग्निं समुद्रवाससम् ॥"
"सवितुः प्रेरकस्य देवस्य सवं यथा प्रसवमिव
भगस्येव भुजिं भगाख्यस्य देवस्य भोगमिव च
समुद्र वाससमग्निं आहुवे आह्वयामि ।" इति
तद्भाष्ये सायनः ॥ * ॥ भोक्तरि, त्रि । यथा,
ऋग्वेदे । ८ । ८ । २ ।
"भुजी हिरण्यपेशसा कवी गम्भीरचेतसा ॥"
"हे भुजी हविषां भोक्तारौ ।" इति तद्भाष्ये
सायनः ॥ )
भुजिष्यः, पुं, ( भुङ्क्ते स्वाम्युच्छिष्टमिति भुज्यते
इति वा भुज + "रुचिभुजिभ्यां किष्यन् ।"
उणा० ४ । १७८ । इति किष्यन् । ) स्वतन्त्रः ।
हस्तसूत्रम् । दासः । इति मेदिनी । षे, ८८ ॥
( यथा, माघे । १५ । ६३ ।
"किमहो नृपाः सममभीभि-
रुपपतिसुतैर्न पञ्चभिः ।
वध्यमभिहत भुजिष्यमसु
सह चानया स्थविरराजकन्यया ॥")
रोगः । इति संक्षिप्तसारोणादिवृत्तिः ॥
भुजिष्या, स्त्री, ( भुजिष्य + टाप् । ) दासी ।
( यथा, रघुः । ६ । ५३ ।
"अथाङ्गदाश्लिष्टभुजं भुजिष्या
हेमाङ्गदं नाम कलिङ्गनाथम् ।
आसेदुषीं सादितशत्रुपक्षं
बालामबालेन्दुमुखीं बभाषे ॥" )
गणिका । इति मेदिनी । षे, ८८ ॥